# रामायणरत्नमाला

## संहितापाठसहिता

SAṂHITĀPĀṬA OF SELECTED GEMS OF SHLOKAS FROM RĀMĀYAṆAM

**Supplementary text along with Audio CD for proper chanting and experiencing benefits of shlokas in रामायणरत्नमाला**

BY -

vyoma
॥ वाचं धेनुमुपासीत ॥
Samskrit . Value Education . Technology

How to use and read this booklet?

Learners are kindly requested to take a print out of this document and for easy use along with C.D.

It is brought to the users' notice that in this document it has been ''assumed'' that yati or avasānam (pause) is in the end of each pāda, as per the audio in the C.D, for easy memorization, understanding and repetition for the users.

Also, this document follows the saṃhitāpāṭha, thus sandhi has been done between letters in a pāda if there is a chance of sandhi.

In some places, sandhi may be made even though there is an option to not to make sandhi.

Commas are placed in ślokās to show that a pause has been made between two pādas and full stops are placed to show that a pause has been made between two paṅkti.

॥श्रीः॥

# रामायणरत्नमाला

## ॥ अथ ध्यानश्लोकाः ॥

शुक्लाम्बरधरँव्विष्णुम् ,
शशिवर्णञ्चतुर्भुजम् ।
प्रसन्नवदनन्ध्यायेत् ,
सर्वविघ्नोपशान्तये ॥ १ ॥

वागीशाद्यास्सुमनसः ,
सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युः ,
तन्नमामि गजाननम् ॥ २ ॥

दोर्भिर्युक्ता चतुर्भिस्स्फटिकमणिमयीम् ,
अक्षमालान्दधाना ,
हस्तेनैकेन पद्मं सितमपि च शुकम् ,
पुस्तकञ्चापरेण ।
भासा कुन्देन्दुशङ्खस्फटिकमणिनिभा ,
भासमानासमाना ,
सा मे वाग्देवतेयन्निवसतु वदने ,
सर्वदा सुप्रसन्ना ॥ ३ ॥

कूजन्तं राम रामेति ,
मधुरम्मधुराक्षरम् ।
आरुह्य कविताशाखाम् ,
वन्दे वाल्मीकिकोकिलम् ॥ ४ ॥

वाल्मीकेर्मुनिसिंहस्य ,
कवितावनचारिणः ।
शृण्वन् रामकथानादम् ,
को न याति पराङ्गतिम् ॥ ५ ॥

यꣳपिबन् सततं -
रामचरितामृतसागरम् ।
अतृप्तस्तम्मुनिँव्वन्दे ,
प्राचेतसमकल्मषम् ॥ ६ ॥

गोष्पदीकृतवाराशिम् ,
मशकीकृतराक्षसम् ।
रामायणमहामाला -
रत्नँव्वन्देऽनिलात्मजम् ॥ ७ ॥

अञ्जनानन्दनँव्वीरम् ,
जानकीशोकनाशनम् ।
कपीशमक्षहन्तारम् ,
वन्दे लङ्काभयङ्करम् ॥ ८ ॥

उल्लङ्घ्य सिन्धोस्सलिलं सलीलम् ,
यश्शोकवह्निञ्जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्काम् ,
नमामि तम्प्राञ्जलिराञ्जनेयम् ॥ ९ ॥

आञ्जनेयमतिपाटलाननम् ,
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनम् ,
भावयामि पवमाननन्दनम् ॥ १० ॥

यत्र यत्र रघुनाथकीर्तनम् ,
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनम् ,
मारुतिन्नमत राक्षसान्तकम् ॥ ११ ॥

मनोजवम्मारुततुल्यवेगम् ,
जितेन्द्रियम्बुद्धिमताँव्वरिष्ठम् ।
वातात्मजँव्वानरयूथमुख्यम् ,
श्रीरामदूतं शिरसा नमामि ॥ १२ ॥

यऽकर्णाञ्जलिसम्पुटैरहरहः ,
सम्यक् पिबत्यादरात् ,
वाल्मीकेर्वदनारविन्दगलितम् ,
रामायणाख्यम्मधु ।
जन्मव्याधिजराविपत्तिमरणैः ,
अत्यन्तसोपद्रवम् ,
संसारं स विहाय गच्छति पुमान् ,
विष्णोऽपदं शाश्वतम् ॥ १३ ॥

तदुपगतसमाससन्धियोगम् ,
सममधुरोपनतार्थवाक्यबद्धम् ।
रघुवरचरितम्मुनिप्रणीतम् ,
दशशिरसश्च वधन्निशामयध्वम् ॥ १४ ॥

वाल्मीकिगिरिसम्भूता ,
रामसागरगामिनी ।
पुनातु भुवनम्पुण्या ,
रामायणमहानदी ॥ १५ ॥

श्लोकसारसमाकीर्णम् ,
सर्गकल्लोलसङ्कुलम् ।
काण्डग्राहमहामीनम् ,
वन्दे रामायणार्णवम् ॥ १६ ॥

वेदवेद्ये परे पुंसि ,
जाते दशरथात्मजे ।
वेदऽप्राचेतसादासीत् ,
साक्षाद्रामायणात्मना ॥ १७ ॥

वैदेहीसहितं सुरद्रुमतले ,
हैमे महामण्डपे ,
मध्ये पुष्पकमासने मणिमये ,
वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते ,
तत्त्वम्मुनिभ्यऽपरम् ,
व्याख्यान्तम्भरतादिभिऽपरिवृतम् ,
रामम्भजे श्यामलम् ॥ १८ ॥

वामे भूमिसुता पुरश्च हनुमान् ,
पश्चात् सुमित्रासुतः ,
शत्रुघ्नो भरतश्च पार्श्वदलयोः ,
वाय्वादिकोणेषु च ।

सुग्रीवश्च विभीषणश्च युवराट् ,
तारासुतो जाम्बवान् ,
मध्ये नीलसरोजकोमलरुचिम् ,
रामम्भजे श्यामलम् ॥ १९ ॥

नमोऽस्तु रामाय सलक्ष्मणाय ,
देव्यै च तस्यै जनकात्मजायै ।
नमोऽस्तु रुद्रेन्द्रयमानिलेभ्यः ,
नमोऽस्तु चन्द्रार्कमरुद्गणेभ्यः ॥ २० ॥

धर्मात्मा सत्यसन्धश्च ,
रामो दाशरथिर्यदि ।
पौरुषे चाप्रतिद्वन्द्वः ,
शरैनञ्जहि रावणिम् ॥ २१ ॥

सकृदेव प्रपन्नाय ,
तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यः ,
ददाम्येतद्व्रतम्मम ॥ २२ ॥

मा निषाद प्रतिष्ठान्त्वम् ,
अगमश्शाश्वतीस्समाः ।
यत् क्रौञ्चमिथुनादेकम् ,
अवधीꣳकाममोहितम् ॥ २३ ॥

बुद्धिर्बलँय्यशो धैर्यम् ,
निर्भयत्वमरोगता ।
अजाड्यँव्वाक्पटुत्वञ्च ,
हनुमत्स्मरणाद्भवेत् ॥ २४ ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

॥ अथ श्रीमद्वाल्मीकिरामायणम् ॥

॥ अथ सङ्क्षेपरामायणम् ॥

तपस्स्वाध्यायनिरतम् ,
तपस्वी वाग्विदाँव्वरम् ।
नारदम्परिपप्रच्छ ,
वाल्मीकिर्मुनिपुङ्गवम् ।। १ ।।

को न्वस्मिन्साम्प्रतँल्लोके ,
गुणवान्कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च ,
सत्यवाक्यो दृढव्रतः ।। २ ।।

चारित्रेण च को युक्तः ,
सर्वभूतेषु को हितः ।
विद्वान्कꣳकस्समर्थश्च ,
कश्चैकप्रियदर्शनः ।। ३ ।।

आत्मवान्को जितक्रोधः ,
मतिमान्कोऽनसूयकः ।
कस्य बिभ्यति देवाश्च ,
जातरोषस्य सँय्युगे ।। ४ ।।

एतदिच्छाम्यहं श्रोतुम् ,
परङ्कौतूहलं हि मे ।
महर्षे त्वं समर्थोऽसि ,
ज्ञातुमेवँव्विधन्नरम् ।। ५ ।।

श्रुत्वा चैतत्त्रिलोकज्ञः ,
वाल्मीकेर्नारदो वचः ।
श्रूयतामिति चामन्त्र्य ,
प्रहृष्टो वाक्यमब्रवीत् ।। ६ ।।

बहवो दुर्लभाश्चैव ,
ये त्वया कीर्तिता गुणाः ।
मुने वक्ष्याम्यहम्बुद्ध्वा ,
तैर्युक्तश्श्रूयतान्नरः ।। ७ ।।

इक्ष्वाकुवंशप्रभवः ,
रामो नाम जनैश्श्रुतः ।
नियतात्मा महावीर्यः ,
द्युतिमान्धृतिमान्वशी ।। ८ ।।

बुद्धिमान्नीतिमान्वाग्मी ,
श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः ,
कम्बुग्रीवो महाहनुः ।। ९ ।।

महोरस्को महेष्वासः ,
गूढजत्रुररिन्दमः ।
आजानुबाहुस्सुशिराः ,
सुललाटस्सुविक्रमः ।। १० ।।

समस्समविभक्ताङ्गः ,
स्निग्धवर्णऽप्रतापवान् ।
पीनवक्षा विशालाक्षः ,
लक्ष्मीवान् शुभलक्षणः ।। ११ ।।

धर्मज्ञस्सत्यसन्धश्च ,
प्रजानाञ्च हिते रतः ।
यशस्वी ज्ञानसम्पन्नः ,
शुचिर्वश्यस्समाधिमान् ।। १२ ।।

प्रजापतिसमश्श्रीमान् ,
धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य ,
धर्मस्य परिरक्षिता ॥ १३ ॥

रक्षिता स्वस्य धर्मस्य ,
स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञः ,
धनुर्वेदे च निष्ठितः ।। १४ ।।

सर्वशास्त्रार्थतत्त्वज्ञः ,
स्मृतिमान्प्रतिभानवान् ।
सर्वलोकप्रियस्साधुः ,
अदीनात्मा विचक्षणः ।। १५ ।।

सर्वदाभिगतस्सद्भिः ,
समुद्र इव सिन्धुभिः ।
आर्यस्सर्वसमश्चैव ,
सदैकप्रियदर्शनः ।। १६ ।।

स च सर्वगुणोपेतः ,
कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये ,
धैर्येण हिमवानिव ।। १७ ।।

विष्णुना सदृशो वीर्ये ,
सोमवत्प्रियदर्शनः ।
कालाग्निसदृशऽक्रोधे ,
क्षमया पृथिवीसमः ।। १८ ।।

धनदेन समस्त्यागे ,
सत्ये धर्म इवापरः ।
तमेवङ्गुणसम्पन्नम् ,
रामं सत्यपराक्रमम् ।। १९ ।।

ज्येष्ठं श्रेष्ठगुणैर्युक्तम् ,
प्रियन्दशरथस्सुतम् ।
प्रकृतीनां हितैर्युक्तम् ,
प्रकृतिप्रियकाम्यया ॥ २० ॥

यौवराज्येन सँय्योक्तुम् ,
ऐच्छत्प्रीत्या महीपतिः ।
तस्याभिषेकसम्भारान् ,
दृष्ट्वा भार्याथ कैकयी ॥ २१ ॥

पूर्वन्दत्तवरा देवी ,
वरमेनमयाचत ।
विवासनञ्च रामस्य ,
भरतस्याभिषेचनम् ।। २२ ।।

स सत्यवचनाद्राजा ,
धर्मपाशेन सँय्यतः ।
विवासयामास सुतम् ,
रामन्दशरथऽप्रियम् ।। २३ ।।

स जगाम वनँव्वीरः ,
प्रतिज्ञामनुपालयन् ।
पितुर्वचननिर्देशात् ,
कैकेय्याऽप्रियकारणात् ।। २४ ।।

तँव्व्रजन्तम्प्रियो भ्राता ,
लक्ष्मणोऽनुजगाम ह ।
स्नेहाद्विनयसम्पन्नः ,
सुमित्रानन्दवर्धनः ।। २५ ।।

भ्रातरन्दयितो भ्रातुः ,
सौभ्रात्रमनुदर्शयन् ।
रामस्य दयिता भार्या ,
नित्यम्प्राणसमा हिता ॥ २६ ॥

जनकस्य कुले जाता ,
देवमायेव निर्मिता ।
सर्वलक्षणसम्पन्ना ,
नारीणामुत्तमा वधूः ॥ २७ ॥

सीताप्यनुगता रामम् ,
शशिनं रोहिणी यथा ।
पौरैरनुगतो दूरम् ,
पित्रा दशरथेन च ॥ २८ ॥

शृङ्गिबेरपुरे सूतम् ,
गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा ,
निषादाधिपतिम्प्रियम् ॥ २९ ॥

गुहेन सहितो रामः ,
लक्ष्मणेन च सीतया ।
ते वनेन वनङ्गत्वा ,
नदीस्तीर्त्वा बहूदकाः ॥ ३० ॥

चित्रकूटमनुप्राप्य ,
भरद्वाजस्य शासनात् ।
रम्यमावसथङ्कृत्वा ,
रममाणा वने त्रयः ॥ ३१ ॥

देवगन्धर्वसङ्काशाः ,
तत्र ते न्यवसन्सुखम् ।
चित्रकूटङ्गते रामे ,
पुत्रशोकातुरस्तदा ॥ ३२ ॥

राजा दशरथस्स्वर्गम् ,
जगाम विलपन्सुतम् ।
मृते तु तस्मिन्भरतः ,
वसिष्ठप्रमुखैर्द्विजैः ॥ ३३ ॥

नियुज्यमानो राज्याय ,
नैच्छद्राज्यम्महाबलः ।
स जगाम वनँव्वीरः ,
रामपादप्रसादकः ।। ३४ ।।

गत्वा तु स महात्मानम् ,
रामं सत्यपराक्रमम् ।
अयाचद् भ्रातरं रामम् ,
आर्यभावपुरस्कृतः ॥ ३५ ॥

त्वमेव राजा धर्मज्ञः ,
इति रामँव्वचोऽब्रवीत् ।
रामोऽपि परमोदारः ,
सुमुखस्सुमहायशाः ॥ ३६ ॥

न चैच्छत् पितुरादेशात् ,
राज्यं रामो महाबलः ।
पादुके चास्य राज्याय ,
न्यासन्दत्त्वा पुनᳶपुनः ॥ ३७ ॥

निवर्तयामास ततः ,
भरतम्भरताग्रजः ।
स काममनवाप्यैव ,
रामपादावुपस्पृशन् ॥ ३८ ॥

नन्दिग्रामेऽकरोद्राज्यम् ,
रामागमनकाङ्क्षया ।
गते तु भरते श्रीमान् ,
सत्यसन्धो जितेन्द्रियः ॥ ३९ ॥

रामस्तु पुनरालक्ष्य ,
नागरस्य जनस्य च ।
तत्रागमनमेकाग्रः ,
दण्डकान्प्रविवेश ह ।। ४० ।।

प्रविश्य तु महारण्यम् ,
रामो राजीवलोचनः ।
विराधं राक्षसं हत्वा ,
शरभङ्गन्ददर्श ह ॥ ४१ ॥

सुतीक्ष्णञ्चाप्यगस्त्यञ्च ,
अगस्त्यभ्रातरन्तथा ।
अगस्त्यवचनाच्चैव ,
जग्राहैन्द्रं शरासनम् ॥ ४२ ॥

खड्गञ्च परमप्रीतः ,
तूणी चाक्षयसायकौ ।
वसतस्तस्य रामस्य ,
वने वनचरैस्सह ॥ ४३ ॥

ऋषयोऽभ्यागमन्सर्वे ,
वधायासुररक्षसाम् ।
स तेषाम्प्रतिशुश्राव ,
राक्षसानान्तथा वने ॥ ४४ ॥

प्रतिज्ञातश्च रामेण ,
वधस्सँय्यति रक्षसाम् ।
ऋषीणामग्निकल्पानाम् ,
दण्डकारण्यवासिनाम् ॥ ४५ ॥

तेन तत्रैव वसता ,
जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा ,
राक्षसी कामरूपिणी ।। ४६ ।।

ततश्शूर्पणखावाक्यात् ,
उद्युक्तान् सर्वराक्षसान् ।
खरन्त्रिशिरसञ्चैव ,
दूषणञ्चैव राक्षसम् ।। ४७ ।।

निजघान रणे रामः ,
तेषाञ्चैव पदानुगान् ।
वने तस्मिन् निवसता ,
जनस्थाननिवासिनाम् ॥ ४८ ॥

रक्षसान्निहतान्यासन् ,
सहस्राणि चतुर्दश ।
ततो ज्ञातिवधं श्रुत्वा ,
रावणᳵक्रोधमूर्छितः ॥ ४९ ॥

सहायँव्वरयामास ,
मारीचन्नाम राक्षसम् ।
वार्यमाणस्सुबहुशः ,
मारीचेन स रावणः ॥ ५० ॥

न विरोधो बलवता ,
क्षमो रावण तेन ते ।
अनादृत्य तु तद्वाक्यम् ,
रावणᳵकालचोदितः ॥ ५१ ॥

जगाम सहमारीचः ,
तस्याश्रमपदन्तदा ।
तेन मायाविना दूरम् ,
अपवाह्य नृपात्मजौ ॥ ५२ ॥

जहार भार्यां रामस्य ,
गृध्रं हत्वा जटायुषम् ।
गृध्रञ्च निहतन्दृष्ट्वा ,
हृतां श्रुत्वा च मैथिलीम् ॥ ५३ ॥

राघवश्शोकसन्तप्तः ,
विललापाकुलेन्द्रियः ।
ततस्तेनैव शोकेन ,
गृध्रन्दग्ध्वा जटायुषम् ॥ ५४ ॥

मार्गमाणो वने सीताम् ,
राक्षसं सन्ददर्श ह ।
कबन्धन्नाम रूपेण ,
विकृतङ्घोरदर्शनम् ॥ ५५ ॥

तन्निहत्य महाबाहुः ,
ददाह स्वर्गतश्च सः ।
स चापि कथयामास ,
शबरीन्धर्मचारिणीम् ॥ ५६ ॥

श्रमणीन्धर्मनिपुणाम् ,
अभिगच्छेति राघवम् ।
सोऽभ्यगच्छन्महातेजाः ,
शबरीं शत्रुसूदनः ।। ५७।।

शबर्या पूजितस्सम्यक् ,
रामो दशरथात्मजः ।
पम्पातीरे हनुमता ,
सङ्गतो वानरेण ह ।। ५८ ।।

हनुमद्वचनाच्चैव ,
सुग्रीवेण समागतः ।
सुग्रीवाय च तत्सर्वम् ,
शंसद्रामो महाबलः ।। ५९ ।।

आदितस्तद्यथावृत्तम् ,
सीतायाश्च विशेषतः ।
सुग्रीवश्चापि तत्सर्वम् ,
श्रुत्वा रामस्य वानरः ॥ ६० ॥

चकार सख्यं रामेण ,
प्रीतश्चैवाग्निसाक्षिकम् ।
ततो वानरराजेन ,
वैरानुकथनम्प्रति ॥ ६१ ॥

रामायावेदितं सर्वम् ,
प्रणयाद्दुःखितेन च ।
प्रतिज्ञातश्च रामेण ,
तदा वालिवधम्प्रति ॥ ६२ ॥

वालिनश्च बलन्तत्र ,
कथयामास वानरः ।
सुग्रीवश्शङ्कितश्चासीत् ,
नित्यँव्वीर्येण राघवे ।। ६३ ।।

राघवप्रत्ययार्थन्तु ,
दुन्दुभेᳵकायमुत्तमम् ।
दर्शयामास सुग्रीवः ,
महापर्वतसन्निभम् ॥ ६४ ॥

उत्स्मयित्वा महाबाहुः ,
प्रेक्ष्य चास्थि महाबलः ।
पादाङ्गुष्ठेन चिक्षेप ,
सम्पूर्णन्दशयोजनम् ।। ६५ ।।

बिभेद च पुनस्सालान् ,
सप्तैकेन महेषुणा ।
गिरिं रसातलञ्चैव ,
जनयन्प्रत्ययन्तदा ।। ६६ ।।

ततᳶप्रीतमनास्तेन ,
विश्वस्तस्स महाकपिः ।
किष्किन्धां रामसहितः ,
जगाम च गुहान्तदा ।। ६७ ।।

ततोऽगर्जद्धरिवरः ,
सुग्रीवो हेमपिङ्गलः ।
तेन नादेन महता ,
निर्जगाम हरीश्वरः ।। ६८ ।।

अनुमान्य तदा ताराम् ,
सुग्रीवेण समागतः ।
निजघान च तत्रैनम् ,
शरेणैकेन राघवः ॥ ६९ ॥

ततस्सुग्रीववचनात् ,
हत्वा वालिनमाहवे ।
सुग्रीवमेव तद्राज्ये ,
राघवᳶप्रत्यपादयत् ।। ७० ।।

स च सर्वान्समानीय ,
वानरान्वानरर्षभः ।
दिशः प्रस्थापयामास ,
दिदृक्षुर्जनकात्मजाम् ॥ ७१ ॥

ततो गृध्रस्य वचनात् ,
सम्पातेर्हनुमान्बली ।
शतयोजनविस्तीर्णम् ,
पुप्लुवे लवणार्णवम् ॥ ७२ ॥

तत्र लङ्कां समासाद्य ,
पुरीं रावणपालिताम् ।
ददर्श सीतान्ध्यायन्तीम् ,
अशोकवनिकाङ्गताम् ॥ ७३ ॥

निवेदयित्वाभिज्ञानम् ,
प्रवृत्तिञ्च निवेद्य च ।
समाश्वास्य च वैदेहीम् ,
मर्दयामास तोरणम् ॥ ७४ ॥

पञ्च सेनाग्रगान्हत्वा ,
सप्त मन्त्रिसुतानपि ।
शूरमक्षञ्च निष्पिष्य ,
ग्रहणं समुपागमत् ॥ ७५॥

अस्त्रेणोन्मुक्तमात्मानम् ,
ज्ञात्वा पैतामहाद्वरात् ।
मर्षयन्राक्षसान्वीरः ,
यन्त्रिणस्तान्यदृच्छया ॥ ७६ ॥

ततो दग्ध्वा पुरीँल्लङ्काम् ,
ऋते सीताञ्च मैथिलीम् ।
रामाय प्रियमाख्यातुम् ,
पुनरायान्महाकपिः ॥ ७७ ॥

सोऽभिगम्य महात्मानम् ,
कृत्वा रामम्प्रदक्षिणम् ।
न्यवेदयदमेयात्मा ,
दृष्टा सीतेति तत्त्वतः ॥ ७८ ॥

ततस्सुग्रीवसहितः ,
गत्वा तीरम्महोदधेः ।
समुद्रङ्क्षोभयामास ,
शरैरादित्यसन्निभैः ॥ ७९ ॥

दर्शयामास चात्मानम् ,
समुद्रस्सरिताम्पतिः ।
समुद्रवचनाच्चैव ,
नलं सेतुमकारयत् ॥ ८० ॥

तेन गत्वा पुरीँल्लङ्काम् ,
हत्वा रावणमाहवे ।
रामस्सीतामनुप्राप्य ,
पराँव्व्रीडामुपागमत् ॥ ८१ ॥

तामुवाच ततो रामः ,
परुषञ्जनसंसदि ।
अमृष्यमाणा सा सीता ,
विवेश ज्वलनं सती ॥ ८२ ॥

ततोऽग्निवचनात् सीताम् ,
ज्ञात्वा विगतकल्मषाम् ।
बभौ रामस्सम्प्रहृष्टः ,
पूजितस्सर्वदैवतैः ॥ ८३ ॥

कर्मणा तेन महता ,
त्रैलोक्यं सचराचरम् ।
सदेवर्षिगणन्तुष्टम् ,
राघवस्य महात्मनः ॥ ८४ ॥

अभिषिच्य स लङ्कायाम् ,
राक्षसेन्द्रँव्विभीषणम् ।
कृतकृत्यस्तदा रामः ,
विज्वरᳵप्रमुमोद ह ॥ ८५ ॥

देवताभ्यो वरम्प्राप्य ,
समुत्थाप्य च वानरान् ।
अयोध्याम्प्रस्थितो रामः ,
पुष्पकेण सुहृद्वृतः ॥ ८६ ॥

भरद्वाजाश्रमङ्गत्वा ,
रामस्सत्यपराक्रमः ।
भरतस्यान्तिकं रामः ,
हनुमन्तँव्व्यसर्जयत् ॥ ८७ ॥

पुनराख्यायिकाञ्जल्पन् ,
सुग्रीवसहितस्तदा ।
पुष्पकन्तत्समारुह्य ,
नन्दिग्रामँय्ययौ तदा ॥ ८८ ॥

नन्दिग्रामे जटां हित्वा ,
भ्रातृभिस्सहितोऽनघः ।
रामस्सीतामनुप्राप्य ,
राज्यम्पुनरवाप्तवान् ॥ ८९ ॥

प्रहृष्टमुदितो लोकः ,
तुष्टᳵपुष्टस्सुधार्मिकः ।
निरायमो ह्यरोगश्च ,
दुर्भिक्षभयवर्जितः ॥ ९० ॥

न पुत्रमरणङ्केचित् ,
द्रक्ष्यन्ति पुरुषाᳵक्वचित् ।
नार्यश्चाविधवा नित्यम् ,
भविष्यन्ति पतिव्रताः ।। ९१ ।।

न चाग्निजम्भयङ्किञ्चित् ,
नाप्सु मज्जन्ति जन्तवः ।
न वातजम्भयङ्किञ्चित् ,
नापि ज्वरकृतन्तथा ।। ९२ ।।

न चापि क्षुद्भयन्तत्र ,
न तस्करभयन्तथा ।
नगराणि च राष्ट्राणि ,
धनधान्ययुतानि च ॥ ९३ ॥

नित्यम्प्रमुदितास्सर्वे ,
यथा कृतयुगे तथा ।
अश्वमेधशतैरिष्ट्वा ,
तथा बहुसुवर्णकैः ॥ ९४ ॥

गवाङ्कोट्ययुतन्दत्त्वा ,
विद्वद्भ्यो विधिपूर्वकम् ।
असङ्ख्येयन्धनन्दत्त्वा ,
ब्राह्मणेभ्यो महायशाः ॥ ९५ ॥

राजवंशान् शतगुणान् ,
स्थापयिष्यति राघवः ।
चातुर्वर्ण्यञ्च लोकेऽस्मिन् ,
स्वे स्वे धर्मे नियोक्ष्यति ।। ९६ ।।

दशवर्षसहस्राणि ,
दशवर्षशतानि च ।
रामो राज्यमुपासित्वा ,
ब्रह्मलोकङ्गमिष्यति ।। ९७ ।।

इदम्पवित्रम्पापघ्नम् ,
पुण्यँव्वेदैश्च सम्मितम् ।
यᳶपठेद्रामचरितम् ,
सर्वपापैᳶप्रमुच्यते ।। ९८ ।।

एतदाख्यानमायुष्यम् ,
पठन् रामायणन्नरः ।
सपुत्रपौत्रस्सगणः ,
प्रेत्य स्वर्गे महीयते ।। ९९ ।।

पठन् द्विजो वागृषभत्वमीयात् ,
स्यात्क्षत्रियो भूमिपतित्वमीयात् ।
वणिग्जनᳶपुण्यफलत्वमीयात् ,
जनश्च शूद्रोऽपि महत्त्वमीयात् ॥१००॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां संहितायाम् बालकाण्डे नारदवाक्यन्नाम प्रथमस्सर्गः

॥ अथ गायत्रीरामायणम् ॥

१. तपस्स्वाध्यायनिरतम् ,
तपस्वी वाग्विदाँव्वरम् ।
नारदम्परिपप्रच्छ ,
वाल्मीकिर्मुनिपुङ्गवम् ॥ (1.1.1)

२. स हत्वा राक्षसान्सर्वान् ,
यज्ञघ्नान् रघुनन्दनः।
ऋषिभिᳶपूजितस्सम्यक् ,
यथेन्द्रो विजयी पुरा ॥ (1.30.23)

३. विश्वामित्रस्स धर्मात्मा ,
श्रुत्वा जनकभाषितम् ।
वत्स राम ! धनुᳶपश्य ,
इति राघवमब्रवीत् ॥ (1.67.12)

४. तुष्टावास्य तदा वंशम् ,
प्रविश्य च विशाम्पतेः।
शयनीयन्नरेन्द्रस्य ,
तदासाद्य व्यतिष्ठत ॥ (2.15.20)

५. वनवासं हि सङ्ख्याय ,
वासांस्याभरणानि च।
भर्तारमनुगच्छन्त्यै ,
सीतायै श्वशुरो ददौ ॥ (2.40.15)

६. राजा सत्यञ्च धर्मश्च ,
राजा कुलवताङ्कुलम्।
राजा माता पिता चैव ,
राजा हितकरो नृणाम् ॥ (2.67.34)

७. निरीक्ष्य स मुहूर्तन्तु ,
ददर्श भरतो गुरुम् ।
उटजे राममासीनम् ,
जटामण्डलधारिणम् ॥ (2.99.25)

८. यदि बुद्धिᳵकृता द्रष्टुम् ,
अगस्त्यन्तम्महामुनिम् ।
अद्यैव गमने बुद्धिम् ,
रोचयस्व महायशः ॥ (3.11.44)

९.भरतस्यार्यपुत्रस्य,
श्वश्रूणाम्मम च प्रभो ।
मृगरूपमिदँव्यक्तम् ,
विस्मयञ्जनयिष्यति ॥ (3.43.17)

१०. गच्छ शीघ्रमितो राम ,
सुग्रीवन्तम्महाबलम् ।
वयस्यन्तङ्कुरुक्षिप्रम् ,
इतो गत्वा द्यराघव ॥ (3.72.17)

११. देशकालौ प्रतीक्षस्व ,
क्षममाणᳶप्रियाप्रिये ।
सुखदुᳵखसहᳵकाले ,
सुग्रीववशगो भव ॥ (4.22.20)

१२. वन्द्यास्ते तु तपस्सिद्धाः ,
तपसा वीतकल्मषाः ।
प्रष्टव्यास्तेऽपि सीतायाः ,
प्रवृत्तिँव्विनयान्वितैः ॥ (4.43.34)

१३. स निर्जित्य पुरीं श्रेष्ठाम् ,
लङ्कान्ताङ्कामरूपिणीम् ।
विक्रमेण महातेजाः ,
हनुमान्मारुतात्मजः ॥ (5.4.1)

१४. धन्या देवास्सगन्धर्वाः ,
सिद्धाश्च परमर्षयः ।
मम पश्यन्ति ये नाथम् ,
रामं राजीवलोचनम् ॥ (5.26.41)

१५. मङ्गलाभिमुखी तस्य ,
सा तदासीन्महाकपेः।
उपतस्थे विशालाक्षी ,
प्रयता हव्यवाहनम् ॥ (5.53.26)

१६. हितम्महार्थम्मृदुपूर्वसंहितम् ,
व्यतीतकालायति सम्प्रति क्षमम् ।
निशम्य तद्वाक्यमुपस्थितज्वरः ,
प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ (6.10.27)

१७. धर्मात्मा रक्षसां श्रेष्ठः ,
सम्प्राप्तोऽयँव्विभीषणः ।
लङ्कैश्वर्यन्ध्रुवं श्रीमान् ,
अयम्प्राप्नोत्यकण्टकम् ॥ (6.41.68)

१८. यो वज्रपाताशनिसन्निपातात् ,
न चुक्षुभे नापि चचाल राजा।
सरामबाणाभिहतोभृशार्तः ,
चचाल चापञ्च मुमोच वीरः॥(6.59.140)

१९. यस्य विक्रममासाद्य ,
राक्षसा निधनङ्गताः।
तम्मन्ये राघवँव्वीरम् ,
नारायणमनामयम् ॥ (6.72.11)

२०. न ते ददृशिरे रामम् ,
दहन्तमरिवाहिनीम्।
मोहिताᳶपरमास्त्रेण ,
गान्धर्वेण महात्मना ॥ (6.94.26)

२१. प्रणम्य देवताभ्यश्च ,
ब्राह्मणेभ्यश्च मैथिली ।
बद्धाञ्जलिपुटा चेदम् ,
उवाचाग्निसमीपतः ॥ (6.119.26)

२२. चलनात्पर्वतेन्द्रस्य ,
गणा देवाश्च कम्पिताः।
चचाल पार्वती चापि ,
तदाश्लिष्टा महेश्वरम् ॥ (7.16.26)

२३. दाराᳶपुत्राᳶपुरं राष्ट्रम् ,
भोगाच्छादनभाजनम् ।
सर्वमेवाविभक्तन्नौ ,
भविष्यति हरीश्वर ॥ (7.34.41)

२४. यामेव रात्रिं शत्रुघ्नः ,
पर्णशालां समाविशत् ।
तामेव रात्रिं सीतापि ,
प्रसूता दारकद्वयम् ॥(7.66.1)

२५. इदं रामायणङ्कृत्स्नम् ,
गयत्रीबीजसँय्युतम् ।
त्रिसन्ध्यँय्यᳶपठेन्नित्यम् ,
सर्वपापैᳶप्रमुच्यते ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

## ॥ अथ आदित्यहृदयम् ॥

ततो युद्धपरिश्रान्तम् ,
समरे चिन्तया स्थितम् ।
रावणञ्चाग्रतो दृष्ट्वा ,
युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य ,
द्रष्टुमभ्यागतो रणम् ।
उपागम्याब्रवीद्रामम् ,
अगस्त्यो भगवान् ऋषिः ॥ २ ॥

राम राम महाबाहो ,
शृणु गुह्यं सनातनम् ।
येन सर्वानरीन् वत्स ,
समरे विजयिष्यसि ॥ ३ ॥

आदित्यहृदयम्पुण्यम् ,
सर्वशत्रुविनाशनम् ।
जयावहञ्जपेन्नित्यम् ,
अक्षय्यम्परमं शिवम् ॥ ४ ॥

सर्वमङ्गलमाङ्गल्यम् ,
सर्वपापप्रणाशनम् ।
चिन्ताशोकप्रशमनम् ,
आयुर्वर्धनमुत्तमम् ॥ ५ ॥

रश्मिमन्तं समुद्यन्तम् ,
देवासुरनमस्कृतम् ।
पूजयस्व विवस्वन्तम् ,
भास्करम्भुवनेश्वरम् ॥ ६ ॥

सर्वदेवात्मको ह्येषः ,
तेजस्वी रश्मिभावनः ।
एष देवासुरगणान् ,
लोकान् पाति गभस्तिभिः ॥ ७ ॥

एष ब्रह्मा च विष्णुश्च ,
शिवस्स्कन्दᳶप्रजापतिः ।
महेन्द्रो धनदᳵकालः ,
यमस्सोमो ह्यपाम्पतिः ॥ ८ ॥

**पितरो वसवस्साध्याः ,**
**ह्यश्विनौ मरुतो मनुः ।**
**वायुर्वह्निᳶप्रजाप्राणः ,**
**ऋतुकर्ता प्रभाकरः ॥ ९ ॥**

आदित्यस्सविता सूर्यः ,
खगᳶपूषा गभस्तिमान् ।
सुवर्णसदृशो भानुः ,
स्वर्णरेता दिवाकरः ॥ १० ॥

हरिदश्वस्सहस्रार्चिः ,
सप्तसप्तिर्मरीचिमान् ।
तिमिरोन्मथनश्शम्भुः ,
त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥

हिरण्यगर्भश्शिशिरः ,
तपनो भास्करो रविः ।
अग्निगर्भोऽदितेᳶपुत्रः ,
शङ्खश्शिशिरनाशनः ॥ १२ ॥

व्योमनाथस्तमोभेदी ,
ऋग्यजुस्सामपारगः ।
घनवृष्टिरपाम्मित्रः ,
विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥

आतपी मण्डली मृत्युः ,
पिङ्गलस्सर्वतापनः ।
कविर्विश्वो महातेजाः ,
रक्तस्सर्वभवोद्भवः ॥ १४ ॥

नक्षत्रग्रहताराणाम् ,
अधिपो विश्वभावनः ।
तेजसामपि तेजस्वी ,
द्वादशात्मन् नमोऽस्तु ते ॥ १५ ॥

नमᳶपूर्वाय गिरये ,
पश्चिमायाद्रये नमः ।
ज्योतिर्गणानाम्पतये ,
दिनाधिपतये नमः ॥ १६ ॥

जयाय जयभद्राय ,
हर्यश्वाय नमो नमः ।
नमो नमस्सहस्रांशो ,
आदित्याय नमो नमः ॥ १७ ॥

नम उग्राय वीराय ,
सारङ्गाय नमो नमः ।
नमᳶपद्मप्रबोधाय ,
मार्ताण्डाय नमो नमः ॥ १८ ॥

ब्रह्मेशानाच्युतेशाय ,
सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय ,
रौद्राय वपुषे नमः ॥ १९ ॥

तमोघ्नाय हिमघ्नाय ,
शत्रुघ्नायामितात्मने ।
कृतघ्नघ्नाय देवाय ,
ज्योतिषाम्पतये नमः ॥ २० ॥

तप्तचामीकराभाय ,
वह्नये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय ,
रुचये लोकसाक्षिणे ॥ २१ ॥

नाशयत्येष वै भूतम् ,
तदेव सृजति प्रभुः ।
पायत्येष तपत्येषः ,
वर्षत्येष गभस्तिभिः ॥ २२ ॥

एष सुप्तेषु जागर्ति ,
भूतेषु परिनिष्ठितः ।
एष एवाग्निहोत्रञ्च ,
फलञ्चैवाग्निहोत्रिणाम् ॥ २३ ॥

वेदाश्च क्रतवश्चैव ,
क्रतूनाम्फलमेव च ।
यानि कृत्यानि लोकेषु ,
सर्व एष रविᳶप्रभुः ॥ २४ ॥

एनमापत्सु कृच्छ्रेषु ,
कान्तारेषु भयेषु च ।
कीर्तयन् पुरुषᳵकश्चित् ,
नावसीदति राघव ॥ २५ ॥

पूजयस्वैनमेकाग्रः ,
देवदेवञ्जगत्पतिम् ।
एतत् त्रिगुणितञ्जप्त्वा ,
युद्धेषु विजयिष्यसि ॥ २६ ॥

अस्मिन् क्षणे महाबाहो ,
रावणन्त्वँव्वधिष्यसि ।
एवमुक्त्वा तदागस्त्यः ,
जगाम च यथागतम् ॥ २७ ॥

एतच्छ्रुत्वा महातेजाः ,
नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतः ,
राघवᳶप्रयतात्मवान् ॥ २८ ॥

आदित्यम्प्रेक्ष्य जप्त्वा तु ,
परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा ,
धनुरादाय वीर्यवान् ॥ २९ ॥

रावणम्प्रेक्ष्य हृष्टात्मा ,
युद्धाय समुपागमत् ।
सर्वयत्नेन महता ,
वधे तस्य धृतोऽभवत् ॥ ३० ॥

अथ रविरवदन्निरीक्ष्य रामम् ,
मुदितमनाः परमम्प्रहृष्यमाणः।
निशिचरपतिसङ्क्षयँव्विदित्वा ,
सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतिसहस्रिकायां
संहितायाम् युद्धकाण्डे आदित्यहृदयन्नाम सप्ताधिकशततमस्सर्गः

## ॥ अथ मङ्गलश्लोकाः ॥

स्वस्ति प्रजाभ्यᳶपरिपालयन्ताम् ,
न्याय्येन मार्गेण महीम्महीशाः ।
गोब्राह्मणेभ्यश्शुभमस्तु नित्यम् ,
लोकास्समस्तास्सुखिनो भवन्तु ॥ १ ॥

काले वर्षतु पर्जन्यः ,
पृथिवी सस्यशालिनी ।
देशोऽयङ्क्षोभरहितः ,
ब्राह्मणास्सन्तु निर्भयाः ॥ २ ॥

अपुत्राᳶपुत्रिणस्सन्तु ,
पुत्रिणस्सन्तु पौत्रिणः ।
अधनास्सधनास्सन्तु ,
जीवन्तु शरदां शतम् ॥ ३ ॥

चरितं रघुनाथस्य ,
शतकोटिप्रविस्तरम् ।
एकैकमक्षरम्प्रोक्तम् ,
महापातकनाशनम् ॥ ४ ॥

शृण्वन् रामायणम्भक्त्या,
यᳶपादम्पदमेव च ।
स याति ब्रह्मणस्स्थानम् ,
ब्रह्मणा पूज्यते सदा ॥ ५ ॥

रामाय रामभद्राय ,
रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय ,
सीतायाᳶपतये नमः ॥ ६ ॥

यन्मङ्गलं सहस्राक्षे ,
सर्वदेवनमस्कृते ।
वृत्रनाशे समभवत् ,
तत्ते भवतु मङ्गलम् ॥ ७ ॥

मङ्गलङ्कोसलेन्द्राय ,
महनीयगुणात्मने ।
चक्रवर्तितनूजाय ,
सार्वभौमाय मङ्गलम् ॥ ८ ॥

यन्मङ्गलं सुपर्णस्य ,
विनताकल्पयत् पुरा ।
अमृतम्प्रार्थयानस्य ,
तत्ते भवतु मङ्गलम् ॥ ९ ॥

अमृतोत्पादने दैत्यान् ,
घ्नतो वज्रधरस्य यत् ।
अदितिर्मङ्गलम्प्रादात् ,
तत्ते भवतु मङ्गलम् ॥ १० ॥

त्रीन् विक्रमान् प्रक्रमतः ,
विष्णोरमिततेजसः ।
यदासीन्मङ्गलं राम ,
तत्ते भवतु मङ्गलम् ॥ ११ ॥

ऋतवस्सागरा द्वीपाः ,
वेदा लोका दिशश्च ते ।
मङ्गलानि महाबाहो ,
दिशन्तु तव सर्वदा ॥ १२ ॥

कायेन वाचा मनसेन्द्रियैर्वा , बुद्ध्यात्मना वा प्रकृतेस्स्वभावात् ।
करोमि यद्यत् सकलम्परस्मै , नारायणायेति समर्पयामि ॥ १३ ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

॥ जानकीकान्तस्स्मरणम् – जय जय राम ॥